467

॥अथसामविधानब्राह्मणप्रारंभोयं॥सूत्रैर्ज्ञेयं॥

189
1971

श्रीगणेशायनमः॥हरिः ओम्॥ ब्रह्महवादृदमग्रआसीत्तस्यतेजोरसोव्यरि
च्यतसब्रह्मासमभवत्सतूष्णीमनसाध्यायत्तस्ययन्मनआसीत्सप्रजापतिर्
भवत्तस्मात्राजापत्यामनसाजुह्वतिमनोहिप्रजापतिः तस्यद्योःशिरआसी
दुरोन्तरिक्षंमध्यंसमुद्रःपृथिवीपादौसवादृदंविश्वंभूतमसृजतत्तस्यसा
मोपजीवनंप्रायछदुपजीवनीयोभवंतियएवंवेद॥तद्योसौकृष्णमदृ
श्यमस्वरंसदेवाउपजीवंतियोवरेषांप्रथमस्तेमनुष्यायोद्वितीयस्तंगंधर्वा
सरसोयस्तृतीयस्तंपशवोयश्चतुर्थस्तंपितरोयेचांडेषुशेरतेयःपंचमस्त
मस्कररक्षांसियेंत्यस्तमोषधयोवनस्पतयोयश्चान्यज्जगतस्माद्दुःसा
मैवान्नमित्युपजीवनीयंप्रायछत्उपजीवनीयोभवतियएवंवेद॥तस्य
हवाएतस्यसाम्नश्चत्वारोवास्थानिस्वरो× सोमेद्येषामासानिस्तोभालोमानि

योहवैसाम्नश्चत्वारःस्वर्णेवेदस्वंचहवैसाम्नःस्वर्णंचभवतिस्वरोवावसाम्नःस्वं
तवेदस्वर्णंयोहवैसाम्नःप्रतिष्ठांवेदप्रतितिष्ठत्यस्मिंश्चलोकेमुष्मिंश्चवाग्वा
वसाम्नःप्रतिष्ठायद्वैतद्वाग्गिरत्यगोवर्चसाभप्रतिष्ठितं॥सयथागायत्रंगृहत्यांगा
यतिबार्हतंजगत्यांजागतंत्रिष्टुभिसमतांचापद्यतेतस्मादेतत्सामेत्याहसमाउ
हवाअस्मिन्छंदांसिसाम्न्यादितिसत्साम्नःसामत्वंकृष्णःप्राजापत्योब्राह्मोवावैश्व
देवोवादित्यानांप्रथमःसाध्यानांद्वितीयोग्नेस्तृतीयोवायोश्चतुर्थःसोमेमंद्रो
मित्रावरुणयोरतिस्वार्यःतेदेवाःप्रजापतिमुपाधावंस्तेब्रुवन्कथंनुवयंस्वर्गं
लोकमियामेतितेभ्यएतान्यज्ञक्रतूंप्रायछत्एतैःस्वर्गंलोकमेष्यथेतितैः
स्वर्गंलोकमायन्स्वर्गंलोकमेतियएवंवेदतेषामहीयंताजाःप्रभ्रुयोवैसा
नसावस्करोचिषोयेचापूतायेचकामप्यवस्तेब्रुवन्कथंनुवयंस्वर्गंलोकमि
यामेतितेभ्यएतत्स्वाध्यायाध्ययनंप्रायछत्तपश्चैताभ्यांस्वर्गंलोकमेष्य

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

थेतिताभ्यांस्वर्गंलोकमायन्त्स्वर्गंलोकमेतियएवंवेदयएवंवेद॥१॥अथातः
स्त्रीनरुछ्रान्व्याख्यास्यामोहविष्यान्नंतरान्नान्भुक्त्वातिस्रोरात्रीर्नोभ्नीयाद्
थापरंत्र्यहंनक्तंभुंजीतथापरंत्र्यहंनकंचनयाचेदथापरंत्र्यहमुपवसेन्निष्ठेद्
हनिरात्रावासीतक्षिप्रकामःसत्यंवदेदनार्यंनसंभाषेतरोरवयोथाजयेन्नित्यं
प्रयुंजीतानुसवनमुदकोपस्पर्शीनमापोहिष्ठीयाभिरथोदकतर्पणंनमोहमा
यमोहमायमऽहमायमायधून्वतेतापसायपुनर्वसवेनमोनमोमौंज्यायोम्मी
यसौम्यायशाम्यायशिवायनमोनमःपारायसूथारायमहापारायपारवृद्
यपारविंदायनमोनमःपुरुषायसूपुरुषायमहापुरुषायमध्यमपुरुषायोत्त
मपुरुषायब्रह्मचारिणेनमोनमऽएतेदेवादित्योपस्थानमेताआज्याहुतयोः
हादशरात्रस्यांतेस्थालीपाकंश्रपयित्वेताभ्योदेवताभ्योजुहुयाद्ग्नयेस्वाहासो २
मायस्वाहाग्नीषोमाभ्यांस्वाहेंद्राग्निभ्यांस्वाहेंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेप्रजापत

योग्नयेस्विष्टकृतेऽथोब्राह्मणतर्पणमेतेनैवातिरुछ्रोव्याख्यातोयावत्सकृदाव
र्तितावदभ्नीयादभस्तृतीयःसरुछातिरुछ्रःप्रथमंचरित्वाशुचिःपूतःकर्मे
ण्योभवतिद्वितीयंचरित्वायत्किंचिदन्यन्महापातकेभ्यःपापंकुरुतेतस्मात्मु
च्यतेतृतीयंचरित्वासर्वस्मादेनसोमुच्यतेथैतान्स्त्रीनरुछ्रांश्चरित्वासर्वे
षुदेवेषुस्नातोभवतिसर्वैर्देवैस्तोतोभवतियश्चैवंवेदयश्चैवंवेद॥२॥अथा
तःस्वाध्यायाध्ययनस्यकाममुत्क्रमेदंतेवात्रीनरुछ्रांश्चरित्वापूतोभवत्य
ग्निप्रतिष्ठाप्याग्न्यभावेतूदकमादित्यंवोपसमाधायदर्भानुपस्तीर्यदर्भपास्ती
र्यः प्राकूलेषुदकेषुवादक्षिणेनपाणिनादर्भमुष्टिंगृहीत्वाप्रथमंत्रिवर्गंनवकृत्वो
नवकृत्वोगायेदेवंसदाप्रयुंजानोग्न्याधेयमवाप्नोतीद्रायपवतेमदंतिपवमान
हवींष्येतेनकल्पेनसर्वमहासर्वमेयाथितेस्याभ्यांदर्शपूर्णमासावतेनैवकल्पे
नभृत्यातिथिशेषभोजिकालेदारानुपेयात्तथाशक्तिचातिथिभ्योदद्यादप्युदक

मेतत एवं व्रतोयद्दिद्रोहंयथा त्वमित्येतेसदाप्रयुंजीतस्ववर्महास्ववमेयादित्येतच्च
पर्वणितथाहास्याग्निहोत्रमविलुप्तंसदद्भुतंसदर्शपूर्णमासंभवतिकर्मातेग्निप्र
तिष्ठाप्यव्रीहिमयांस्तंडुलान्श्रिःप्रक्षात्यजुहुयादग्नयेस्वाहासोमायपवित्रवते
वरुणायधन्वंतरयेमनसाप्राजापत्यांब्रह्मणेग्नयेस्विष्टकृतइतिपश्चाद्धोतः
पंचरात्रिकाणांव्रीहियवौभोजनमसौहित्यमंतेत्वग्न्यादिरुक्तकृत्यः काम्यानांचा
विप्रतिषेधस्तमिंद्रवाजयामसीतिचतुर्वर्गेणचातुर्मास्यान्यवाप्नोत्यस्यप्रेषितिपाशु
कानिन्नातारमिंद्रंयजामहइत्येताभ्योपशुबंधंपयोव्रतएतेनकल्पेनबृहद्दिद्रोय
गायतेतिचतुर्वर्गेणसौत्रामण्यौसौत्रामण्यौ॥ ३॥अथातःसासरात्रिकाणांभै
क्षंपयोव्रतमेकेभैक्षाथोयेवग्रामंप्रविश्योन्नान्यत्रःस्वाध्यायहाचमुत्सृजेद्धः
त्रायीतनायोभुवेयादंतेत्वग्न्यादिरुक्तः कृत्यःकाम्यानांचाकाम्यानांचाविप्रतिषेधः ३
र्दृश्वयंतीरितिदशरात्रंरथंतरंचवामदेव्यंचतान्यनुसवनप्रयुंजानोग्निःशममवा

प्नोतियत्तायज्ञावोअग्नयइतिचतुर्वर्गेणाग्निष्टोमंनमस्तेअग्नओजसइति
दशरात्रोक्थ्यंपुनानःसोमधारयेतिवर्गेणषोडशिनंपरीतोषिंचतासुतमितिव
र्गेणातिरात्रंपयोव्रतमेतेनकल्पेनतिस्रोवाचउदीरतइतिवाजपेयंमासमेते
नकल्पेनयद्वाग्निंक्रिविंयथेतिदशरात्रात्सोप्यौमाणंमासंचतुर्थेकालेभुंजानःआ
जुहोताहविषामजंयध्वमितिदशरात्राद्दशरात्रंसंवत्सरमेतेनकल्पेनअबोध्य
ग्निरितिदशरात्रंरथंतरंचवामदेव्यंचबृहच्चवैरूपंचवैराजंचमहानाम्याच
रेवत्यश्चैतान्यनुसवनंप्रयुंजानोगवामयनमवाप्नोतिराजनरोहिणाभ्यां
तापश्चित्तेपयोव्रतएतेनकल्पेनसोमःपवतेजनिसामतीनामितिचतुर्वे
र्गेणचातुर्मास्यानिसौमिकान्यवाप्नोतिसंवत्सरमष्टमेकालेभुंजानोग्म्याग्न
यमंप्रयुंजइवेतिदशरात्रमावर्त्तयन्नेवत्रीयंद्वादशंसंवत्सरमवाप्नोत्याग्नेयमै
द्रंपवमानमित्येतेनकल्पेनचत्वारिंवर्षाणिप्रयुंजानःशतसंवत्सरमवाप्नो

195
1992

तिसर्वेप्रयुंजानःसहस्रसंवत्सरमवाप्नोत्यनश्नत्सश्हितांसहस्रेणवाएषा
यताप्नवत्तसहस्रेणवाप्रथमःस्त्रिवर्गःसावित्र्यांगायत्रंमहानाम्न्यश्चैषा
मृतानामसंहितेतयावेदेवाःअमृतत्वमायन्नमृतत्वमेवियएवंवेदरंह
न्वोजसेतिप्रथमोत्समेत्वामिवाद्योनरःसपूर्व्योमहोनांपुरांभिदुर्युवाकविः
रुपप्रक्षेमधुमत्तिक्षियंतःपवस्वसोममधुमांस्तावाजरूपकृद्वाहसंमाधु
छंदसमेषामाधुछंदसीनामसंहितेतयावेदेवास्वर्गंलोकमायन्त्स्वर्गंलो
कमेतियएवंवेदवोराजात्तद्वोवर्गआज्यदोहानिदेवव्रतानिचैषारौद्रीनामसं
हितेतान्प्रयुंजन्रुद्रंप्रीणातिरुद्रंविष्णुःप्रक्षस्यवृष्णःप्रकाव्यमुशानेव
ब्रुवाणइतिवाराहमंत्यपुरुषव्रतेचैषावैष्णवीनामसंहितेतान्प्रयुंजन्वि
ष्णुंप्रीणातिआदस्कृधीणासआतूनइतिवर्गोमज्यमानःस्फरत्यइतिप्रथ
मषष्ठेचैषावैनायकीनामसंहितेतान्प्रयुंजन्विनायकंप्रीणातिआमंद्रेरिं ५

द्रहरिभिरांन्नोविश्वासुहव्यंप्रसेनानीरितिवर्गोःपवित्रवंतइतिहैषास्कंदस्य
संहितेतान्प्रयुंजन्स्कंदंप्रीणातियद्वाउविश्पतिःसनादग्नेमृणःस्वक्षन्नमीमद
त्स्यभिप्रेष्ठमक्रांसमुद्रःकनिक्रंतीतिहैषापित्र्यानामसंहितेतान्प्रयुंज
न्पितॄन्प्रीणात्यास्यदघ्नमुदकेतिष्ठन्नक्येनाकीत्येतत्रिसप्तकृत्वोगायेदेतत्स
र्वावाचोगत्तसंमित्तमेतेनसर्वान्कामानवाप्नोतियश्चैवंवेदयश्चैवंवेद॥१॥ 197/1972
अथातःप्रायश्चित्तानामनादेशेमंत्राबलवंतस्तपोन्विताःपावनाभवंत्या
पन्नःप्रायश्चित्तंचरेदभ्यासःसाम्नात्तदग्नावरंकाष्ठमुत्कादधिक्रा-
ग्णोअकारिषमित्येतत्तगायेत्पुरुषमृक्तंविष्णुर्विचक्रमइतिब्राह्मणमु
क्त्वात्रिभ्रातरंमातरंपितृव्यमितिगुरुजालीयान्प्रसाद्यापक्षिणींरात्रिमुपो
ष्यनवाहंसोमरारणंतिप्रथममेकविंशतिंचक्लोपाध्यायमातरंपितरमित्ये
तेषुत्रिरात्रमुपवसन्नेतस्यमनध्याप्यमध्याप्यसप्तरात्रमुपवसन्सदागावः

तुलै

शुचयोविश्वधायस इत्येतत्गायेदयाज्ययाजनेदक्षिणांस्यत्कामसंचतुर्थकाले भुंजानः कानीदित्येतत्गायेदमेध्यदर्शनेयेतेयंथा अथोदिवइतितथामेध्यघ्राणेभोज्यभोजनपूर्वमेध्यघ्राशनेवानिष्ठुरीषीभावः स्त्रिरात्रावरंतूपवसन्नेतोन्विंद्रस्तवामशुथमितिपूर्वेसदासहस्रकृत्वाआवर्त्तयन्बकुन्युपसनीयानिकृत्वात्रिभिरनश्नत्परायणेःपूतोभवतिसुरापीत्वासंवत्सरमष्टमेकालेभुंजानोयत्स्याण्वोःसंभवेदवाङ्नाभ्यूर्ध्वंजानुपरिहस्त्रिरङ्गउपस्पृशन्स्थारात्रौस्थानासनाभ्यांपवित्रंतदित्यृक्तत्रणाहोरात्राणिजपन्ग्रामद्वारेस्थानासनभोजनानियत्रकृतेतत्रवसेन्नप्रवसेत्स्वकर्मणाभिभाषेतचतुर्थेणब्राह्मणानामग्रतःप्राश्नीयात्ग्रामद्वारस्यैवाग्रलावर्त्तयकायाभिक्रामेदस्तोन्यथारात्र्यंपूर्णेसंवत्सरेतैलंलवणंक्षारमग्निंगांबीजानित्यालब्धवंतंब्राह्मणान्ब्रूयुश्चरितंतवेत्योभोइतिब्रूया ५

सस्थावरान्सस्थावरान्हित्वनरंतंचरितंतवसुचरितंतवेत्योहोइतिब्रूयादस्तऊर्ध्वंकेशश्मश्रूलोमनखानिवापयित्वाहतंवसनंपरिधायब्राह्मणान्स्वस्तिवाचयित्वापूतोभवत्येतेनकर्त्येनभ्रूणहामूर्वमेतेनब्रह्महाशुथ्याशुथीयमुत्तरमेतेनसुवर्णस्तेनोभिक्रीष्टमित्यभिक्रीष्टमितिच॥ ५॥ ब्राह्मणंवृत्वामासमुदकेवासश्वस्तुर्थेकालेभुंजानोदिवाबहिरास्याद्वासांसेशुक्लेतेअन्यद्युजसंतेअन्यदित्येतत्गायेदन्यस्यहत्वाऊर्ध्वंचरन्नयसहस्रमानवइतिहितीयंगुरुदारान्गत्वासुरापकल्येनाक्रान्तित्येतद्गायेत्ब्राह्मणदारान्गत्वात्रीन्ऊर्ध्वांश्चरन्ब्रह्मजज्ञानमितिपूर्वमन्यस्यगत्वाऊर्ध्वंचरन्अरण्योरित्येतत्शूद्रांगत्वात्रिरात्रमुपवसन्निडामग्नदित्येतदकालेदारानुपयत्रीन्प्राणानायम्यकयानायाहितायमावर्त्तयेब्राह्मणाद्धार्ष्णीहत्वात्रीन्ऊर्ध्वांश्चरन्ब्रह्मजज्ञानमित्युत्तरमन्यस्यहत्वाऊर्ध्वंचरन्ननुहित्वासुतसोमेत्यनुहित्वासुत

199
1972

सोमेति॥ ६॥ राज्ञः प्रतिगृह्य मासमुदकेवसंदिवामुंजानोमहत्तसोमोमहिष
श्वकारेयेसङ्घायेतदन्यस्यप्रतिग्राह्यस्यकृष्णंचरन्नत्रिकृकुथिश्येतदद्तादान
एकरात्रउपवसन्नग्निस्तिग्मेनेतिद्वितीयंब्राह्मणायावगूर्यप्राणगायेन्निहत्या
पानंश्रोणितेक्षरतिप्रसोमदेववीतयइतिद्वितीयंराजन्यवैश्योसचनंगतोह
त्वाब्राह्मस्वकृत्येनशुध्याशुध्रीयमुत्तरंश्रद्दहत्वाहादत्त्वारात्रमुपवासउदकेच
वासोयत्तद्वसोमइतिद्वितीयंगोहत्वाहादत्त्वारात्रमुपवासउदकेचवासोवय
घत्वास्कतावंतइतिद्वितीयमन्यत्राणिहत्वैकरात्रमुपवसन्नग्निस्तिग्मेनेति
द्वितीयमकीर्णीत्रीन्कृष्णाश्वरन्परीतोषिंचतासकृतमितिचतुर्थमावर्त्तयेद्
तेनकृत्येनपरिवेत्तापरिविंदश्वसोमराजानंवरुणमित्येतदयोनौरतासि
कृताग्निमूर्धाघृतवतीद्वितीयंयदितस्तन्नोमुमेतिचश्रूद्रजीविःकासेविलोप
रभ्यत्रीन्कृष्णाश्वरन्चक्रमित्येतत्गायेत्वैश्यजीविकायांवयः सुपर्णाइत्ये ६

दृत्तोकन्यांवैकृष्णंचरन्नभात्व्योअनात्वमित्येतङ्घायेतान्प्रतिगृह्येसैनेवकृ
त्येनशंपदमित्येत ५

तद्राजन्यजीविकायांपवस्वसोममधुमांश्चमावेत्येतदभित्र्यंमेषमितिवास
दाप्रयोगोब्राह्मणमनृतमभिद्रास्यतस्यापंप्रतिपद्यतेगुह्यंप्रकाशयन्नधे
भाग्भवत्यग्निस्तिग्मेनेतिवर्गंप्रयुंजानस्तेनस्तरतिस्तेनंतरति॥७॥
रसान्विक्रीयकृष्णंचरन्घृतवतीद्वितीयमुभयतोदत्तान्विक्रीयकृष्णंचरंको
अद्ययुंक्तेइत्येतत्सान्प्रतिगृह्येसैनेवकृत्येनशंपदमित्येतदभ्युदितोभद्रो
नोअग्निराहुतइत्येतत्गायेदभ्यस्तमितोनतस्यमायायाचनेतिदुस्वप्नेघ
द्यानोदेवसवीतयइतिद्वितीयमन्यस्मिन्स्वनाद्यातेकयानायाद्वितीयभाव
त्येदग्निदग्धेघृतात्कान्यवाजुहुयाज्ज्ञानः परेणधर्मेणेत्येतेनाग्नयेस्वाहे
तिचभूथिकजग्धेतिकांजुहुयान्नकिदेवाइनीमसीतीद्रायस्वाहेतिचकूर्चना
दाएकरात्रमुपवसन्अग्निस्तिग्मेनेतिद्वितीयमन्यस्मिन्स्वनाद्यातेकयानायद्वित्रि
तिद्वितीयंमनुष्येघभिवातेषुघृतात्कानांयवानामाठंकांजुहुयादग्नेस्तेनोज

201/1972

तमद्रतिश्चतुर्वेर्गेणसामांतेषुस्वाहाकोरग्नयेस्वाहावायवेस्वाहासूर्यायस्वाहाचं
द्रायस्वाहेतिचस्नेहवदमांसमन्नंब्राह्मणान्भोजयित्वास्वस्तिवाचयित्वास्वस्ति
हैषांभवतिगोषभिघातासक्तसक्तघृतास्कानांयवानामाढकंजुहुयात्आवो
राजानमित्येतेनरुद्रायस्वाहेतिचयावतीर्धूमस्यन्नतिस्वस्तिहासांभवत्यश्वेष
भिघातेषुघृतास्कानांयवानामाढकंजुहुयादश्वीरथीतिद्वितीयेनाश्विभ्यांस्वाहेति
चयावतोधूमस्यन्नतिस्वस्तिहैषांभवतिस्वस्तिहैषांभवति॥८॥प्रथमप्रपाठ
कःसमाप्तः॥छं॥अथातःकाम्यानामनादेशेचिरात्रमुपवासःपुष्येणारभः
आयुष्याण्येवप्रथममबोध्यग्निर्महित्रीणामितिद्वाभ्यांनरंद्रंनरोग्वामेगयमा
युरितिचास्यनिधनंकुर्यात्यमसुदेत्रातारमिंद्रंहवेहवेसुहवमित्येतस्यस्थानेस्वस्तिन
इंद्रोसोमःपुनात्यंसक्रथमंविश्वतोदावन्नितिपूर्ववद्रहस्योदुत्तमंवरुणपा ७
शमित्येषारिष्टवर्गएतेषामेकमनेकंवासर्वाणिवाप्रयुंजानःशतवर्षाणिजी

वत्तिजरयेवविस्संसतेभ्राजाभ्राजेशुक्रंचंद्रेसजनरोहिणिकेशुक्रियाद्येआउस्य
रिलादीनिचत्वारिसेतुषामन्येषपवित्रवर्गएतेषामेकमनेकंवासर्वाणिवाप्रयु
जानःपूतोभवतिबहुप्रतिगृह्ययाजयित्वासन्नंमात्मानंमन्यमानोगोसूक्तो
श्वसूक्तेसुत्याश्चुत्याश्चुत्रीयतेतरत्समदीत्येतानिप्रयुंजानःपूतोभवतितव
त्थावीर्यंप्रयुंजानःशुचिःपूतोब्रह्मलोकमभिसंपद्यतेनचपुनरावर्ततउदुत्तम
वरुणपाशमित्येतत्सदाप्रयुंजानःसंबाधंनिगछतिनिगश्चप्रमुच्यतेगोरा
न्सर्षपांस्तुचेत्सुनायतस्तनइत्येतेनप्राश्नीयाद्दीर्घायुर्भवतित्रीन्वोदकांजलीस्त
दाचामोपिवासोमभिद्रंमंदतुलेत्येताभ्योदीर्घायुर्भवतिदीर्घायुर्भवति॥९॥
अथयस्याजातानिप्रमीमीयरन्सग्रोधश्चंगांत्रारमूलंचोत्थाप्यतद्हस्तिवृत
कारयेन्मणिमग्निंप्रतिष्ठाप्यावृतादुत्वामणिंनिधायअबोध्यग्निरित्येतेनाभि
जुहुयात्सहस्रकृत्वःशतावरंस्तीर्यंगर्भमासिनिदध्याद्राज्यंशोषेमेखला

203
1972

यो मणिं धारयेसुमांसंजनयति ८ जातस्यकर्णौ विसृजेकुमार माज्यशेषं प्राश्नाये
स्वर्णिस्रोतांसिसर्पयेदभ्युंजीतहरहः स्नतऊर्ध्वमुपयुंक्तेपुनः प्रयोगः श
तंवर्षाणिजीवतिजरयैवविस्रंसते अथयोरक्षसागृहीतस्यान्यानिहतस्यव
क्षस्यधमपुनश्शुक्रयोगाः सरूपवत्सायान्यस्यावाज्यंवैत्वंमणिमुत्थाप्यत
दहरिवृतंकारयेन्मणिमग्निप्रतिष्ठाप्यघृताद्भ्वामणिंनिधारयेद्भ्रित्रिधा
नुश्चरणमित्येतेनाभिजुहुयात्सहस्रकृत्वः शतावरंतमणिंकंठेनशिरसावा
धारयन्मुच्यतेरक्षसायदाऽविरूपतिरितिचैतत्सदाप्रयुंजीतस्वस्तिहास्यभवत्या
मयाधीकोभ्यंरुत्तविश्वाः एतनाअभिभूतरंनरंदृत्येतेनाभिजुहुयात्सहस्र
कृत्वः शतावरंजीवतिचास्यनिधनंकुर्यादेतेनेवसदाप्नोतीयान्मुच्यतआ
मयाव्यानोमित्रावरुणेतिचैतत्सदाप्रयुंजीतस्वस्तिहास्यभवतिस्वस्तिहास्य
भवति॥ १०॥ अथयदस्यरुहेच्छन्नोदेवीरहस्येनघृतमभिगीयाभ्युज्यो

८ कंठे

म्यतीहद्विकाद्येनवोदकंपाययेछीताभिरद्भिरभिषेचयेसोमंराजानंसदनाद
ग्नेग्निंहोतारमित्येतानिचैनमश्रावयेद्धाम्यतिहरंरवपुष्पीसर्षकृगंधांचो
त्थाप्यसदहस्त्रिवृतंकारयन्मणिमग्निप्रतिष्ठाप्यावृताद्भ्वामणिंनिधायच
र्षणीधृतमितिवर्गेणाभिजुहुयात्सहस्रकृत्वःशतावरंतंमणिंकंठेनशिरसा
वाधारयतोनसर्पभयंभवतिकयानायांचसर्पसामसदाप्रयुंजीतस्वस्तिहा
स्यभवतिश्वेतपुष्पांवृहतीमुत्थाप्यसदहस्त्रिवृतंकारयेन्मणिमग्निप्रति
ष्ठाप्यावृताद्भ्वामणिंनिधायमोषुत्वावाघतश्चनेत्येतेनाभिजुहुयात्सहस्र
कृत्वः शतावरंतंमणिंकंठेनशिरसावाधारयतोनशस्त्रभयंभवतियतइद्र
भयामहइतिचैतत्सदाप्रयुंजीतस्वस्तिहास्यभवतिश्वेतपुष्पमर्कमुत्थाप्य
तदहस्त्रिवृतंकारयेन्मणिमग्निप्रतिष्ठाप्यावृताद्भ्वामणिंनिधायस्वाग्नि
रामर्कंणाभिजुहुयात्सहस्रकृत्वः शतावरंतंमणिंकंठेनशिरसावाधारयन्

205
1972

वङ्कनो भवति दीर्घतमसो कोऽकं शिरोऽक्ष्णीवाऽऽतिचेलानि प्रयुंजानः सर्वत्रा
न्नं लभते समन्यायं लोलिनिधनं प्रयुंजानो नि पपासया म्रियते दूरशहो त्रीयं
प्रयुंजानो नाक्षुन्म्रियते चोदसदृति तृतीयं प्रयुंजीत नेनं यक्ष्मा गृण्हाति त्व
मिमा ओषधीरित्येतत्सदा प्रयुंजानो नगरेणा म्रियते सतेपयांसि समुद्ये
तु वाजादिति पूर्वेण प्रथमं संग्रामं ग्रसेत उत्तरेण नि गिरिद्विषमध्यस्थान्न
भवति नैनं हिंसन्ति नैनं हिंसति ॥ २१ ॥ करवीरदंडमुत्थाप्य देवव्रतैरभिजु
हुयात्तदनुगानन्नास्तेन हस्तगतेनयत्र क्वचगच्छति सर्वत्र हास्य स्वस्ति भवति
तेनन्नगरवानिगमवाग्रामवागोष्ठवागारवा मनसाध्यायन्परिलिखेत्ता
वानिष्ठाः प्रविशंति प्रतिभये ध्रुवदेवव्रत माद्यंगीलाम ध्यम मावर्तये
न्नगते ध्रुवन्युत्तमंसासाप्यित्वाविरमेद्ध्रुवन्नारुह्यान्नन्नदृष्ट्वादेवव्रता
नि मनसाध्याये न्नैनं हिंसंति अमानुषे भयेकयानयास्तृतीयमावर्तये ९

न्नैनं हिंसन्त्य ध्यानमभ्युत्थितआमंद्रेरितिचर्गेगीलाअनपेक्ष्यमाणोव्रजेत्
स्वस्त्यर्थचरितः पुनरेतिनाध्वनिचप्रमीयतेन्योवैनमनुगायेत्कदाचन
स्तीरसीत्येतानि चैनमभिश्रावयेदर्धसाम्नि प्रदक्षिणमावर्तयेसमाप्या
नपेक्ष्यमाणः परोव्रजेत्स्वस्त्यर्थंचरितः पुनरेतिनाध्वनिचप्रमीयतएषाउ
षाअपूर्व्येतिसविशंसदाप्रयुंजीलाकालंस्वस्त्ययनमुदितेयद्यकृच्चवृत्र
हन्नितिआकालंस्वस्त्ययनंमूलफलैरुपवसथंकृत्वामासमुपवसेदरण्ये
निस्तांसपोमुनिर्यारोहिणीवाचोषीवापूर्णमासीस्यात्तदहनुघंतमाहित्ये
मुपतिष्ठेतोद्यंतमसस्परीत्येतेन ततऊर्ध्वंतद्व्रतस्यऊक्ष्मंचत्वारिवर्षाणि
प्रयुंजानोजरामृत्यूजहाति जरामृत्यूजहाति ॥ २२ ॥ अथैकमनुष्याणा
मावर्तेनास्त्रियोवापुंसोवाश्रवणेनव्रतमुपेत्यपूर्वैः प्रोष्ठपदैः पात्रुभिः
प्रतिकृतिकृत्वाप्राक्शिरसंपूर्वोणेहदक्षिणाशिरसंमध्याऊप्रत्यक्शिरसं

207
1992

मपराण्हेधरात्रावुदङ्मुखोरसंतस्याद्धृदयदेशमधिष्ठायार्यंत्वंद्रसोमाइतिब्रा
ह्मणस्येदंतएकमितिक्षत्रियस्येषप्रकोवादृतिवैश्यस्यविशोष्टइंद्राधसइतिशू
द्रस्योद्यंतमंसस्परीतिवासर्वेषांसोवर्णीप्रतिकृतिंकृत्वाब्राह्मणस्यराजती
क्षत्रियस्यौदुंबरीवैश्यस्यायसीशूद्रस्यौदुंबरीवासर्वेषामयमसाधितिश्रा
कृतिरसमग्नोप्रतिष्ठाध्यौदुंबरेणस्रुवेणाज्येनाभिजुहुयादछामदृतिनिध
नेनगुणीहास्यभवतिकृष्णव्रीहीणांनखनिर्भिन्नानांपिष्टमयीप्रतिकृतिं
कृत्वापिष्टस्वेदंस्वेदयित्वासर्पषतैलेनाभ्यज्यतस्याःक्षरेणागान्यवदाया
ग्नोजुहुयात्प्रमंदिनदृत्येतेननैनंस्वयंप्राश्नीयादितरस्याभावेम्रियेताथयः
कामयेतावर्त्तेयेयमितिएकरात्रंक्षरसंयुक्तंसिक्थस्कृतासोमधुमत्तमा
दृतिवर्गमेतेषामेकमनेकंवासर्वाणिवाप्रयुंजानःएकरात्रेणकुठुंविनमा १०

त्तेयेतिद्विरात्रेणराज्ञोपजीविनंत्रिरात्रेणराजानंचतूरात्रेणग्रामंपंचरात्रेण
नगरंषड्रात्रेणजनपदंसप्तरात्रेणाक्षरक्षांसिअष्टरात्रेणापत्यपिशाचान्नव
रात्रेणयक्षान्नरात्रेणगंधर्वाप्सरसोअर्धमासेनवैश्रवणोमासेनेंद्रंचतुर्भिः
प्रजापतिंसंवत्सरेणयत्किंचिज्जगत्सर्वंहास्यगुणीभवतिगुणीभवति॥१३॥
अथातःसौभाग्यानांयदिंद्रोअनयदृचेजातमंधसइतिनवमदृचमए
तेषामेकमनेकंवासर्वाणिवाप्रयुंजानःसुभगोभवतिबृहद्याःसप्तमा
ष्टमाभ्यामिंद्राणीसदालयेयन्नसुभगोभवात्यषामार्गंदंतपवनंघृतमधुलि
सभद्रोनोअग्निराहुतइत्येतेननिष्ठीवन्संवत्सरंभक्षयन्सुभगोभवतिभ
गोनचित्रइत्येताभ्यांमंजयन्सुभगोभवतीमंमिंद्रेतिवर्गंप्रयुंजानःसर्व
जनस्यप्रियोभवतिपरिप्रियादिवःकविरित्येतयाकामयेतस्त्रीभावयेत्का
मयतेहेनमथयास्यनगुणीयास्यासांब्रूयादाचामेतींद्रोविश्वस्यराजती

209
1972

येताभ्यामाचामेत्सदपांसून्वास्याग्नेर्जुहुयात्द्येतेपंथाअंथोदिवद्रतितेऽलवे
नांयाचथित्वापाणीपरिमर्दनंनग्नेर्प्रदापयेदग्नआयाहिवीतयद्रतिद्वितीयेना
नागत्यांविरमेगोजरायुगमहस्तिस्रष्टंश्रोषधित्वाप्रियंगुकासभासहस्या
मध्यंडाभ्रमिपाचकंसचांकाचकपुष्पमित्येताउत्थाप्यत्सद्दभ्रूणांनिकारय
दानोविश्वासहव्यमित्येतेनत्रिःसंवाधांभ्रूणेषुकृत्वाअग्नआयाहिवीतय
द्रतिरहस्येनाद्भिःसंयूयतानिनाशुचिःसन्नेयद्दापस्पर्शनाद्दात्सदनुलेपनंतेनानुलि
म्पेयांयामुपस्पर्शनंतेसासैनंकामयतेगम्यान्मास्नातउपस्पर्शनाद्दुस्यलेबुध्येप्रियं
गुकाआवपेद्यदापर्णानिसंहरेदथैनमुत्थाप्यचतुरंगुलमुभयतःपरिछिद्यम
ध्यमभ्रूरेत्सदनुलेपनंतेनानुलिंपेद्यांश्चनिलानस्यविरूपंदृश्येतेनास्य
वेत्रयस्ताःप्रवृजिताश्चवत्रयाभवंतिकन्याप्रवाहणेकरात्रोपोषितोभावास्या
यानिशिचतुष्पथएत्यूषुब्रवाणितएसनाभिषिचेन्निरभिषिक्तोप्रदीयतआ

तेवत्साइतिपुंसःस्त्रियारात्रोपोषितःकृष्णचतुर्दश्यांरात्रावादंगारमादत्यचतु
ष्पथेबाधकमिध्ममुपसमाधायमत्स्यकरभिरित्येतेजुहुयादग्नेभ्रुवमहांअ
सीतिपूर्वेणाग्निर्वृत्राणितिद्वितीयायांतेआहुतिकोश्रोकृत्वाहरितालेनगो
रुदयत्रोणितेनचेक्षुरेणसन्नयेत्यंद्विष्यात्प्रमंहिष्ठीयेनास्यश्राव्याम
वकिरेदकारंचभस्मनानेकग्रामेवसत्यथालोयत्रास्यानोत्वमिद्रयत्राअसि
पवतेहयंतोहरिरित्येतेषामेकमनेकंवासर्वाणिवाप्रयुंजानोयत्रास्वीभवति
प्रियंगुकावापुष्पेणाभिजुहुयात्द्यत्रोमेतिसदनुलेपनंतेनानुलिंपेत्संवत्स
रंयत्रास्वीभवतियत्रास्वीभवति॥ १५॥ अथातोब्रह्मवर्चस्यानारथंतरंवाम
देव्यंनौधसंरथेतंमहानाम्न्यायज्ञायज्ञीयमित्येतेषामेकमनेकंवासर्वाणि
वाप्रयुंजानोब्रह्मवर्चसीभवतिकस्तमिद्रेतिद्विकंप्रयुंजानोब्रह्मवर्चसीभ
वतित्रेत्याचास्यभवतिजगन्मयासद्रतिषड्वंप्रयुंजानोब्रह्मवर्चसीभव

211.
1972

स्यष्टरात्रोपोषितो ब्राह्मीमुत्थाप्य प्रजापतेर्हृदयेनाभिगीय सहस्रकृत्वः प्राश्नीया
च्छ्रुतनिगादी भवति पुष्पाणि वास्योदकेन संवत्सरयज्ञेन प्राश्नीयाच्छ्रुतनिगा
दी भवति मासं सोमभक्षं स्यात्सदस स्पतिमद्भुतमित्येतेन श्रुतनिगादी भवति सदा
चैतत्प्रयुंजीत श्रुतनिगादी भवति भारद्वाजिकायाजिवह्वामुत्थाप्य तद्दह्यूर्णका
रयित्वा मधुसर्पिर्भ्यां सह प्रागन्नप्राशनात्कुमारं प्राशयेद्दृभिङ्काथिनोऽहर्हि
रण्येतेन श्रुतनिगादी भवति हरिद्रायास्तु लावराध्यै चूर्णं इत्येतेनैवकल्पेन संवत्स
रं यज्ञेन प्राश्नीयात्श्रुतनिगादी भवति वचामेतेनैवकल्पेन वा चोव्रतेन पूर्वेण प्रा
श्नीयाच्छ्रुतनिगादी भवति मस्याक्षतशृंखपुष्पीवचाकेरदीघृतानि बाह्लिकेर
णाभिजुहुयात्सहस्रकृत्वः शातावरमेतेनैवकल्पेन प्राश्नीयाच्छ्रुतनिगादी भ
वति वचायाश्चित्रवृतं कारयेन्मणिमग्निप्रतिष्ठाप्य शुक्लाङ्गुलामणिं निधाय
वा चोव्रतेनोत्तरेणाभिजुहुयात्सहस्रकृत्वः शातावरं मणिं कंठे नशिरसा १२

धारयन्कथास्रश्रेयान्भवति वचां मधुकमित्येतेऽस्यवधाय आपोपेनेत्येतं मन
सानुद्रुत्यालेस्वाहाकारेणानिर्गीय राजन्वानहमराजकस्त्वमसीत्युक्त्वा विवदेत्स्पर्ध
द्विराजनिचोत्तरावादी भवत्युत्तरावादी भवति ॥१५॥ अथातः पुत्रियाणामिष्टा
नस्यनिष्टामग्नेप्रयोरायेयमग्निः स्रुचीर्यस्यजातः परेणनहिवश्वरमंचनसो
मः पवतेजनितामतीनामितिसर्वाण्यपस्येनियवसारथंतरंव्याहृतिवर्गोरू
रुचदितिद्वे एतेषामेकमनेकं वा सर्वाणि वाप्रयुंजानः स्वरूपादीर्घायुषः पुत्रान्
लभतेरोहिण्यां वा रोहिण्यां वा गोः सरूपवत्साया पयसिरक्तशालीनांस्थाली
पाकंश्रपयित्वापरमेष्ठिनः प्राजापत्यस्यव्रतेनाभिजुहुयात्सहस्रकृत्वः शातावर
मेतेनैवाभिगीयोद्धृत्यसभार्यः प्राश्नीयात्सुरूपादीर्घायुषः पुत्रान्लभतेकृ
ष्णायाश्चगोः सरूपवत्सायापयसिकृष्णाषष्टिकानांस्थालीपाकंश्रपयित्वाकृष्ण
पंचम्यामुदितसोमत्वमिमामोषधीरित्येतेनाभिजुहुयात्सहस्रकृत्वः शातावर

213
1972

मेतेनैवाभिगीयोत्थ्यसभार्यः प्राश्नीयास्करूपांदीर्घायुषः पुत्रांल्लभतेकोभ्यंघृ
तंपुरुषव्रतेनाभिजुहुयात्दनुगानंराउत्तरेणसदाप्राश्नीयास्करूपांदीर्घायुषः
पुत्रांल्लभतेउदंगवानांयोग्येगछेतंगृहीत्वासद्दहस्त्रियंवृतंकारयेन्मणिमग्नि
प्रतिष्ठाप्याघृताद्धुत्वामणिंनिधायोभ्यातेजातमंधसइतितृतीयेनाभिजुहुया
स्सहस्रकृत्वःशतावरंतंमणिंकंठेनशिरसावाधारयन्शतानुचरोभवतिशा
तानुचरोभवति॥१६॥द्वितीयपाठकःसमाप्तः॥ ॥अथातोधन्यानांशु
क्लवासप्रयोगस्नानमुवलेखनमनिष्ठीवनंसदाचांजनंसत्यवचनंक्षम
नंसाधारणंकेशश्मश्रुलोमनखानांतुनान्यत्रव्रताद्दानेवापेयात्कालं
एवंवृतोयदुदीरतआहर्यतायेतिवर्गमेतेषामेकमनेकंवासर्वाणिवाप्रयुंजा
नःश्रीमान्यशस्वीपुष्टिमान्धन्योभवतिगिरिणःपाहिनःस्वस्तिमितिचैत
त्सदाप्रयुंजीतमयिश्रीरितिचास्यनिधनंकुर्यात्श्रीमान्भवतिश्रीन्वोदकांज ९३

जलीत्सदाचामेदयंसहस्रमानवदृत्येताभ्यांश्रीरितिचोत्तरस्यनिधनंकुर्याद्धी
मान्भवतिसक्तुमंथंदधिमधुघृतंमिश्रमालाविन्नांविंदवइत्येतेनसन्नयेद्वा
माविन्नांविंदवोनमामिद्रातिरिच्यतइत्येतेनपिबेदलक्ष्मीनुदतेतिष्येणघृतंकी
र्णीयादायाहिसखुमाहिलवइत्येतेनपिबेदलक्ष्मीनुदतेगोरान्सर्षपांस्तिष्येण
चूर्णंकारयित्वेद्रेहिमत्स्यंधसइत्येतेनसंयूयतेमुखंपाणीपादौचसर्वाणिचां
गानिसर्वांश्चसंश्लेषानुत्सादयन्नलक्ष्मीन्नुदतेगोरान्सर्षपानग्नौजुहुयाद्ध
ईडाविंद्रयश्चिरइत्येतेनहिरण्यंलभतेव्रीहियवानग्नौजुहुयान्नीवाघास
मत्स्यइत्येतेनधान्यंलभतेव्रीहियवौसर्पिर्मेधुमिश्रायास्येवधायसपूर्योमहो
नामित्येतंमनसानुद्रुत्यानेस्वाहाकारेणनिगिरेदेवंसदाप्रयुंजानःसहस्रंल
भतइमउलाविच्छंतइत्येतेनाहुतिसहस्रंजुहुयात्सहस्रंलभतेमासाधि
षितोविल्वानांदधिमधुघृताक्तानांश्रायंतीयेनाष्टसहस्रंजुहुयात्सिद्धसोवर्णो

215
1972

न्यसिध्रे राज्ञ आनिनय्यग्नोधंदंतपवनंघृतमधुलिप्तंगव्योषुणाद्रुत्येताभ्या
मनुष्टीवंसंवत्सरंभक्षयन्त्सहस्रंलभतेसहस्रंलभते॥२७॥त्रिरात्रोपो
षितोभद्रोनोअग्निरुतद्रुत्येतेनाहुतिसहस्रंजुहुयात्सहस्रंलभतऔदुंबरी
वासमिधोघृताक्ताःसहस्रंजुहुयाद्धंलभतेव्रीहियवानग्नोजुहुयाद्धान्यंल
भतेहादन्नारात्रोपोषितएवाद्यसिवीर्यमितियेतेनाहुतिसहस्रंजुहुयाद्धनंल
भतएतांश्चसर्वान्कामानवाप्नोतित्रिरात्रोपोषितःकृष्णचतुर्दश्यांप्रयुंजानःप्रथमेनाहिरण्यंल
भतेद्वितीयेनधान्यंतृतीयेनपशूंश्चतुर्थेनपुत्रान्पंचमेनग्रामंषष्ठेनय
शःसप्तमेनब्रह्मवर्चसमष्टमेनस्वर्गंलोकमवाप्नोतिसंवत्सरंगोग्रासमाहरन्
गावश्चिद्वासमन्यच्चेतियेतेनंत्योविंदतेश्रियंवैरूपोपोषितःकृष्णचतुर्दश्यांप्रयुंजानःलक्ष्मी
र्जुषतेसांजानुदघ्नंउदकंतिष्ठन्नाभिदघ्नेधान्यंकक्षदघ्नेपशून्नास्यदघ्नेपुत्रा
न्ग्रामंचानपेक्षितावासक्तोह्लोतीर्णःसहस्रंलभतआहुतिसहस्रंवा

जुहुयात्सामांतेषुस्वाहाकारैरेतेषांकल्पानांयथाभूयस्तथाश्रेयःस्तथाश्रे
यः॥२८॥गाःप्रकाल्यमानाश्चोपकाल्यमानाश्चसदोपतिष्ठेत्गव्योषुणाद्र
त्येताभ्यांस्कीयंतेबहुलाभवंतिसदाभोजनस्योपनीतस्याग्नमग्नोजुहुयाद
ग्नेविवस्वदुषसइतिपूर्वेणबलिंचोत्तरेणकुर्याद्बहुपशुधनधान्योभवत्य
ष्टरात्रोपोषितोमावास्यायांनित्येकृतेक्षीरिण्यरण्येमांसंसंस्कृतमेक
तस्यवाराध्यमाणिभद्रायोपहरेदेषस्यतेमधुमांद्रंसोमइत्येतेनहिरण्य
द्रोणंलभतेत्रिरात्रोपोषितःशुक्लचतुर्दश्यांक्षीरंमांसंपायसंवोपहरेत्त्रिर
त्रेमेसप्तधेनवोदुदुक्षिरइत्येतेनदेवान्पोषान्पुष्यतिबहुपुरुषंचास्यभव
तिक्रियाश्चानेनकुरुतेत्रिरात्रोपोषितःकृष्णचतुर्दश्यांमत्स्यानुपहरेन्म
हाराजायसंश्रवसइतिवर्गेणसुरान्योधान्पुष्यतिबहुपुरुषंचास्यभवतिक्रि
याश्चानेनकुरुतेअथातोवास्तुशमनंप्रदक्षिणंप्रतिद्वारज्वायछदवातरद्

रोषु चयत्राभिसमेयुस्तत्रोपरिष्टेद्वेतेषुत्राभीयत्लात्रा श्रीपर्णानांपत्रेवांस्तू
पकिरेद्दक्षतैश्चस्रुमात्रोभिश्चपूर्वैः प्रोष्ठपदैः गृह्याग्निंप्रतिष्ठाप्यधानावंतंक
रंभिणमित्येतद्धुत्वापायसमग्नेजुह्वयास्वरेषांचपलात्रापर्णमध्येषुबल्युप
हारः प्रजापतयेस्वाहेतिमध्यउपहरेदिंद्रायेतिपुरस्ताद्धायव्यदृत्यवांतरदे
शेयमायेतिदक्षिणतः पितृभ्यदृत्यवांतरदेशेवरुणायेतिपश्चात्महाराजा
येदृत्यवांतरदेशेसोमायेत्युत्तरतोमहेंद्रायेत्यवांतरदेशेवास्कयदृत्यधस्ता
दूर्ध्वंनमोब्रह्मणइतिहिविर्बलुपशुधनधान्यहिरण्यमायुष्मत्सुरुषवीरसू
सूभगाअविधवंस्त्रीकंत्रिवंपुण्यंवास्तुरभवतिचतुर्षुमासेषुप्रयोगःसं
वत्सरेवापुनःप्रयोगःपुनःप्रयोगः॥ ९९॥ अथातोदृष्टदर्शनानांसंकरात्सं
करेवासिनीमावदेछूपैणाक्षतानांधांस्रुमनसश्चात्रकृत्वासंविष्टःप्राकृशि
रांश्चोदेशेशिरस्तकृत्वाकदममुद्धवेत्येतत्कृत्वावाग्यतःप्रस्वपेत्सत्र्यति

९५

हगरगोलिकांवासमुद्धेवधायाहस्रुभाहितदृत्येतद्धुत्वावाग्यतःप्रस्वपेत्स
त्र्यतिहकन्यांवोपवासयेद्दृषरजसमादर्शेचायमग्निःश्रेष्ठतमदृत्येतेनव्यु
ष्टायांरात्रावेतेनैवाभिगीयपरिमृज्यब्रूयात्स्त्रियतिपत्रूयतिहोदश्वरावोपवास
येप्रमित्रायप्रार्यमणदृत्येतेनव्युष्टायांरात्रौत्रायावेतेनैवाभिगीयप्रोक्षब्रूयास्
त्रियतिपत्रूयतिहवंत्रामत्योवात्रकल्कंगंधैः प्रलिप्यमध्यमेनोपवासयेद्व्युष्टायो
रात्रावेतेनैवाभिगीयपरिमृज्यब्रह्मचारिणंब्रूयात्धारयतमितिसन्नमत्योः
सिद्धिंविद्याद्यष्टिंवात्येनचतुरंगुलत्रोमिनीयोपवासयेद्व्युष्टायांरात्रावेतेनैवा
भिगीयपरिमृज्यप्रमृणत्योंकुलीपवभिः पूर्यमाणेषुसिद्धायांषाड्वापौर्णमा
स्यांबीजानिधारयित्वोपवासयेत्तुलांचेद्रमिदंवतालयदृत्येतेनव्युष्टायांरात्रा
वेतेनैवाभिगीयपरिमृज्यप्रोक्षधारयेद्यानिगीयांसितान्यृक्षाणिक्षतानांहोरा
त्रीकुर्यात्भावाभावयोरानोविश्वासहव्यमित्येतेनव्युष्टायांरात्रावेतेनैवाभि

219
1972

गीय ब्रोक्ष्य ब्रूयादाऽऽभस्वेति भावमाऽऽभ मेसिस्म ज्योतिष्मंतं विधूमानामंगा
राणां द्वौरात्रीकुर्यात् द्यावंतोवास्य स्तेवार्धिनः ऋक्ष्यग्नेनवस्यमदित्येतेनैनान्यु
गपद्धुतेनाभिषिंचेद्यः पूर्वः प्रज्वलितोविधूमेनार्चिषाप्रदक्षिणमभिपर्यावर्त
तेसयजतीतिविद्यात् ज्योतिष्मंतंकुर्यान्मानुषीणांघृतेनसद्योमथितेनप्रसो
मदेववीतयदित्येतेनैनं ज्वलयत्यः पश्यान्नाम्यतिसचिरंजीवतिसचिर्
जीवति॥२०॥राजानमभिषेचयेत्तिष्येणश्रवणेनवाव्रीहियवेस्तिलमाषै
र्धिमधुसर्पिर्नोजातरूपैर्यत्रास्त्रीभ्योनदीभ्यः समुद्राच्चोदकान्याहृत्योदुव
रेभद्रासनेचैव्याघ्रेचर्मण्यत्तरलोम्न्यासीनंजीवंतीनांगवांशृंगकोटीरभिषि
ञ्चेदभ्रातृव्यदस्तिवहस्येमयंकामयेतैकराजस्यांनास्यचक्रंप्रतिहन्येतैकरा
णाभिषिंचेदभिषिञ्चेद्यात्ग्रामवरदासीत्रातंसहस्रंतदधीनश्चभवेद्दु १६
तेयवद्रोणंजुहुयाद्वातआवातुभेषजमित्येतेनत्रांम्यतिहरुष्णास्तिलान

ग्नोजुहुयात्सदैवोदासोअग्निरित्येतेनैनंरुतानिहंसंतिसान्येवप्रतिगछंतिव्री
हियवानग्नोजुहुयात्संचनिधनेनयामदेवेयेनैनंरुतानिहंसंतिसान्येवप्रति
गछंतिताम्रराजतजातरूपायसीमुद्रांकारयित्वोद्यातेजातमधसदृतिचतु
र्थेनाभिजुहुयात्सहस्रकृत्वःत्रातावरंतांमुद्रांदक्षिणेनपाणिनाधारयेत्नैनं
नंरुतानिहंसंतिसान्येवप्रतिगछंतिसान्येवप्रतिगछंति॥२१॥संग्रामंयु
युत्समानस्योदकमभिजुहुयात्सोमंराजानंवरुणमित्येतेनततएनंपा
ययेद्योराजाचर्षणीनामितिपूर्वेणयेचात्रमुख्यास्करस्तानुत्तरेणाभिषिंचेद
थहैनंसन्नाहयेत्सेनानीरितिवर्गेणाथास्यरथंयुज्यादाश्वासहस्रमात्रात्
मितिवर्गेरुद्रंथंतराभ्यांचक्रेवामदेव्येनाधिष्ठानंसंघातंवृषणंरथमित्ये
तेनाधितिष्ठेत्प्रयांतंचैनमनुगायेदिंद्रस्यनुवीर्याणीत्यादिस्तीर्षेगीत्वात्रीनि
धूनस्येदुत्वामदत्तुसोमादित्येतेनजयतिनपराजीयतेसंदृश्यैनंधूम्रायगोः

221
197-2

सरूपवत्सायाघत द्रोणंजुहुयात्सत्यमित्येतिरहस्येनजयतिनपराजीयते
बोधकमयीनांसमिधांघृताक्तानांसहस्रंजुहुयादभिक्षापूर्वंपीतयइतिचष
ट्कारंचास्यनिधनंकुर्योज्जयतिनपराजीयतेसेधकमयीनांसमिधांघृ
ताक्तानांसहस्रंजुहुयात् अभित्यंमेषमितीद्वंवह्स्येनम्णादितिचास्यनि
धनंकुर्याज्जयतिनपराजीयतेसप्तरात्रोपोषितःससमुख्यानुद्दिश्यस
द्यःपीडितेनसर्षपतैलेनसैसैहेनाकृतिसहस्रंजुहुयात्सप्तरात्रान्नेभव
तिरहस्यश्वरथपदातीनांपिष्टमयीप्रतिकृतिंकृत्वापिष्टस्वेदंस्वेदयित्वास
र्षपतैलेनाभ्यज्यतस्यांक्षुरेणागान्यवदायाग्नेजुहुयादभिक्षाशूरनोनुम
इतिरहस्येनयत्रहिशब्दोयावताजुहोतिसर्वेनभवतित्रिरात्रोपोषितःक
ष्णाचतुर्दश्यांरात्रावुदगार्याहृत्यचतुष्पथेबाधकमिध्ममुपसमाधाय
वेभीतकस्रुवेणसर्षपतैलेनाकृतिसहस्रंजुहुयात्संमील्येनयत्रशब्द

स्यात्तत्रपुरुषःभूत्वाहस्तउत्तिष्ठतिसंब्रूयाज्जहिमुंजहीतिहरेयेनमामगमस्य
क्षुरेणागांन्यवदायाग्नेजुहुयात्कर्षवर्गाद्येश्वतुर्भिःसपलंमनसाध्यायत्स
घोनभवतिसघोनभवति॥२२॥अथयःकामयेतामुष्यस्वाण्याजनित्राणि
परिक्रामेयमितिमहेनोअधबोधयेयेतसदाघृतंजीतायुवेलायांचेतस्मै
दमुष्यस्वाण्याजनित्राणिपरिक्रामत्यथयःकामयेतसर्वत्राग्निर्मेज्वलेदि
तिसंवत्सरंत्रिरात्राग्निंधारयेदग्नआयाहिवीतयइतिप्रथमेनोपतिष्ठेद्वितीयेन
येनपरिहरेत्तृतीयेनपरिचरेत्सर्वत्रहास्यज्वलतियदिछलितंहरतिअथ
यःकामयेतपित्राचान्नगुणीभुतान्प्रत्ययमितिसंवत्सरंचतुर्थेकालेभुंजा
नःकपालेनभेक्षंचरन्प्राणाग्निशुंमहीनामित्येतसदासहस्रकृत्वआवर्तयेत्
प्रत्ययस्ययाचितमेतेनकृत्येनद्वितीयंयुंजानःपित्रन्प्रयतिसंवत्सरमष्टमकाले
भुंजानःपाणिभ्यांपात्रार्थंकुर्वाणोप्रयन्नस्यस्वाश्वसथादीषमाणादेत्येत

योः पूर्वेसदासहस्रकृत आवर्तयन् गधर्वाप्सरसः पशून्यत्र यत्रैतमेतेनकल्पेन
नहितीयंप्रयुंजानोदेवान्यजतियद्वैदर्शिंब्रूयाद्दर्शानुगानमेतेनकल्पेन
चत्वारिवर्षाणिप्रयुंजीतनिधयोस्यप्रकाशंतेयेपृथिव्यामष्टमरात्रोपोषितो
मावास्यायांमुखआज्यंकृत्वाग्निंनरइत्येतयोः पूर्वमृनसानुद्रुयात्स्वाहाका
रेणाग्नोजुहुयाद्द्युषायांरात्रौभूतोपंचहास्याकार्षापणाभवंतिव्ययकृताश्च
पुनरायंतिमूलमशून्यंकुर्याद्वाप्रविशंतीनांयापश्चात्स्यात्तस्याःशिरोभ्यु
नमृज्यपुछमनुमृज्यपाणीसहत्यारंगमेजयत्तिष्ठत्सर्वारात्रीद्वितीयमावत्ते
यन्नजंभकाहास्यसार्वकामिकाभवंतिसार्वकामिकाभवंति॥२३॥अथयः
कामयेतपुनर्नप्रत्याजायेयमितिरात्रिंप्रपद्येपुनर्भूर्मयोभूः कन्यांशिखंडि
नीपात्राहस्तायुवतीकुमारिणीमादित्यश्चक्षुषेवातःप्राणायसोमोगंधाय
पत्नेहायमनोनुज्ञायपृथिव्यैशरीरसाहेनमुवाचास्मिन्त्संवत्सरेमरिष्यस्य १८

स्मिन्नयनेस्मिन्नावस्मिन्मासेस्मिन्नर्धमासेस्मिन्नहोरात्रेस्मिन्नहोरात्रे
रात्रेस्मिन्नहोरात्रेस्मिन्नहोरात्रेस्मिन्नहन्यस्यारात्रावस्यांवेलायामस्मिन्मुहूर्ते
मरिष्यस्यहिस्वर्गंलोकंगच्छदेवलोकंवाब्रह्मलोकंवाक्षत्रलोकंवाविरोचमानस्मि
ष्ठन्विरोचमानानामहियोनिंप्रवेत्स्यानाहंयोनिंप्रवेक्ष्यामिभूतोस्मायाब्रह्मणो
दुहितुःसम्भाजवस्यायजायतेम्रियतेसंधीयतेचरात्रिस्तमापुनातुरात्रिःस्व
मेसुष्यांसयत्पुराणमाकाशंतत्रमेस्थानंकुर्वन्नपुनर्भवायपुनर्जन्मण २२५
सावदेवरात्रीरात्रेर्व्रतंचरात्रेर्व्रतंच॥२४॥चतुरोमासान्योभक्षोगामनु १९७२
गत्याअरण्येशुचौदेशेमठंकृत्वातत्रप्रविशेत्कमंडलुमुदकोपस्परोनार्थमा
दायत्रीन्त्ससरात्रानुदकुपवसन्ऋचंसामयजामहइत्येतयोः पूर्वेसदास
हस्रकृत आवर्तयन्यदिदेवताः पशूयंतिसिध्यंतादित्यथोस्थानमासरिक्षाहा
स्यसिध्यभवत्यंतरिक्षक्रमणंचद्वाराणिचास्यवृणंतेद्वितीयमेतेनकल्पेनप्र

प्रयुंजानः कामचारीमनोजवा भवतिशुक्लानुपवसेत्सर्वान्कामान्दृष्टशुक्लवासा
श्वेतेनानुलिप्तः सुमनसोधारयन्त्यमूषुपूर्वेसहासहस्रुखआवर्तयन्ये
मानुषाः कामास्तानवाप्नोतिद्वितीयमेतेनकल्पेनप्रयुंजानोयेदेवास्तान्तेनमा
समुपवसेदेकमेकमयाचितंभुंजीतमथिवचेदस्येतेनकल्पेनचत्वारिवर्षाणि
प्रयुंजानः त्रयाणांलोकानामाधिपत्यंगच्छतिविरुधावप्यस्येकस्याथयान्य
नादिष्टाकामकल्यानितेषांयथाश्रुतिस्मृतिलिंगैः कामासरसंयुक्तआभि
प्रापिकंकर्मसोयंप्राजापत्योविधिस्तमिमंप्रजापतिर्बृहस्पतयेप्रोवाचबृ
हस्पतिर्नारदायनारदोविश्वक्सेनोव्यासायपाराशर्यायव्यासःपाराशर्योजै
मिनयेजैमिनिःपाप्यिंजायपैप्यिंजःपाराशर्यायणायपाराशर्यायणोबा
दरायणायबादरायणःस्तांडिभ्यांतांडिर्भायनिभ्योंतांडिर्भायनिर्बहुभ्यःसोय
मनुचनायब्रह्मचारिणेसमावर्तमानायाख्यायोपाध्यायग्रामकरसहस्रं २९

श्वेतेचाश्वंप्रदायानुज्ञातोवायंकामंकामयतेतमाप्नोतितमाप्नोति॥ २५॥ ॥
तृतीयपाठकः समाप्तः॥ ॥ इतिसामविधानब्राह्मणंसमाप्तं॥ श्री॥ ॥
श्रीवेदपुरुषार्पणमस्तु॥ ॥श्रीरामचंद्रायनमः

227
1972

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ इति सामविधानब्राह्मणसमाप्तः ॥ रामकृष्ण ॥

228
1972